॥ नारायणवर्म ॥

राजोवाच

यया गुप्तः सहस्राक्षः सवाहान् रिपुसैनिकान् ।
क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियम् ॥ १ ॥

भगवंस्तन्ममाख्याहि वर्म नारायणात्मकम् ।
यथाऽततायिनः शत्रून् येन गुप्तोऽजयन्मृधे ॥ २ ॥

श्रीशुक उवाच

वृतः पुरोहितस्त्वाष्ट्रो महेंद्रायानुपृच्छते ।
नारायणाख्यं वर्माह तदिहैकमनाः शृणु ॥ ३ ॥

विश्वरूप उवाच

धौतांघ्रिपाणिराचम्य सपवित्र उदङ्मुखः ।
कृतस्वांगकरन्यासो मंत्राभ्यां वाग्यतः शुचिः ॥ ४ ॥

नारायणमयं वर्म सन्नह्येद्भय आगते ।

www.yousigma.com

दैवभूतात्मकर्मभ्यॊ नारायणमयः पुमान् ॥ ५ ॥

पादयॊर्जानुनॊरूर्वॊरुदरॆ हृद्यथॊरसि ।
मुखॆ शिरस्यानुपूर्व्यादॊंकारादीनि विन्यसॆत् ॥ ६ ॥

नमॊ नारायणायॆति विपर्ययमथापि वा ।
करन्यासं ततः कुर्याद्द्वादशाक्षरविद्यया ॥ ७ ॥

प्रणवादियकारांतमंगुल्यंगुष्ठपर्वसु ।
न्यसॆद्धृदय ऒंकारं विकारमनु मूर्धनि ॥ ८ ॥

षकारं तु भ्रुवॊर्मध्यॆ णकारं शिखया दिशॆत् ।
वॆकारं नॆत्रयॊर्युंज्यान्नकारं सर्वसंधिषु ॥ ९ ॥

मकारमस्त्रमुद्दिश्य मंत्रमूर्तिर्भवॆद्बुधः ।
सविसर्गं फडंतं तु सर्वदिक्षु विनिर्दिशॆत् ॥ १० ॥

"ऒं विष्णवॆ नमः"

इत्यात्मानं परं ध्यायॆद्ध्यॆयं षट्शक्तिभिर्युतम् ।
विद्यातॆजस्तपॊमूर्तिरिमं मंत्रमुदाहरॆत् ॥ ११ ॥

www.yousigma.com

हरिर्विदध्यान्मम सर्वरक्षां न्यस्तांघ्रिपद्मः पतगॆंद्रपृष्ठॆ ।
दरारिचर्मासिगदॆषुचापपाशान् दधानॊऽष्टगुणॊऽष्टबाहुः ॥ १२ ॥

जलॆषु मां रक्षतु मत्स्यमूर्तिर्यादॊगणॆभ्यॊ वरुणस्य पाशात् ।
स्थलॆ च मायावटुवामनॊऽव्यात् त्रिविक्रमः खॆऽवतु विश्वरूपः ॥ १३ ॥

दुर्गॆष्वटव्याजिमखादिषु प्रभुः पायान्नृसिंहॊऽसुरयूथपारिः ।
विमुंचतॊ यस्य महाट्टहासं दिशॊ विनॆदुर्न्यपतंश्च गर्भाः ॥ १४ ॥

रक्षत्वसौ माऽध्वनि यज्~झकल्पः स्वदंष्ट्रयॊन्नीतधरॊ वराहः ।
रामॊऽद्रिकूटॆष्वथ विप्रवासॆ सलक्ष्मणॊऽव्याद्भरताग्रजॊ माम् ॥ १५ ॥

मामुग्रधन्वा निखिलप्रमादान्नारायणः पातु नरश्च हासात् ।
दत्तस्त्वयॊगादथ यॊगनाथः पायाद्गुणॆशः कपिलः कर्मबंधात् ॥ १६
॥

सनत्कुमारॊऽवतु कामदॆवाद्धयशीर्षॊ मां पथि दॆवहॆलनात् ।
दॆवर्षिवर्यः पुरुषांतरार्चनात् कूर्मॊ हरिर्मां निरयादशॆषात् ॥ १७ ॥

धन्वंतरिर्भगवान् पात्वपथ्याद्द्वंद्वाद्भयादृषभॊ निर्जितात्मा ।

यज्ञश्च लॊकादुत तत्कृतान्नॊ बलॊ गणात् क्रॊधवशादहींद्रः ॥ १८ ॥

द्वैपायनॊ भगवानप्रबॊधाद्बुद्धस्तु पाखंडगणात् प्रमादात् ।
कल्की कलॆः कालमलात् प्रपातु धर्मावनायॊरुकृतावतारः ॥ १९ ॥

मां कॆशवॊ गदया प्रातरव्याद्गॊविंद आसंगव आत्तवॆणुः ।
नारायणः पातु सदाऽऽत्तशक्तिर्मध्यंदिनॆ विष्णुररींद्रपाणिः ॥ २० ॥

दॆवॊऽपराह्णॆ मधुहॊग्रधन्वा सायं त्रिधामाऽवतु माधवॊ माम् ।
दॊषॆ हृषीकॆश उतार्धरात्रॆ निशीथ ऎकॊऽवतु पद्मनाभः ॥ २१ ॥

श्रीवत्सलक्ष्माऽपररात्र ईशः प्रत्यूष ईशॊऽसिधरॊ जनार्दनः ।
दामॊदरॊऽव्यादनुसंध्यं प्रभातॆ विष्णुः श्रीमान् भगवान् कालमूर्तिः ॥ २२ ॥

चक्रं युगांतानलतिग्मनॆमि भ्रमत्समंताद्भगवत्प्रयुक्तम् ।
दंदग्धि दंदग्ध्यरिसैन्यमाशु कक्षं यथा वायुसखॊ हुताशः ॥ २३ ॥

गदॆऽशनिस्पर्शनविस्फुलिंगॆ निष्पिंढि निष्पिंढ्यजितप्रियाऽसि ।
कूष्मांडवैनायकयक्षरक्षॊभूतग्रहांश्चूर्णय चूर्णयारीन् ॥ २४ ॥

त्वं यातुधानप्रमथप्रॆतमातृपिशाचविप्रग्रहघॊरदृष्टीन् ।
दरॆंद्र विद्रावय कृष्णपूरितॊ भीमस्वनॊऽरीन् हृदयानि कंपयन् ॥ २५ ॥

त्वं तिग्मधाराऽसि वरारिसैन्यमीशप्रयुक्तॊ मम छिंदि छिंदि ।
चक्षूंषि चर्मन् शतचंद्र छादय द्विषामघं नॊ हर पापचक्षुषाम् ॥ २६ ॥

यन्नॊ भयं ग्रहॆभ्यॊऽभूत् कॆतुभ्यॊ नृभ्य ऎव च ।
सरीसृपॆभ्यॊ दंष्ट्रिभ्यॊ भूतॆभ्यॊऽघॆभ्य ऎव च ॥ २७ ॥

सर्वाण्यॆतानि भगवन्नामरूपास्त्रकीर्तनात् ।
प्रयांतु संक्षयं सद्यॊ यॆऽन्यॆ श्रॆयःप्रतीपकाः ॥ २८ ॥

गरुडॊ भगवान् स्तॊत्रस्तॊमच्छंदॊमयः प्रभुः ।
रक्षत्वशॆषकृच्छ्रॆभ्यॊ विष्वक्सॆनः स्वनामभिः ॥ २९ ॥

सर्वापद्भ्यॊ हरॆर्नामरूपयानायुधानि नः ।
बुद्धींद्रियमनःप्राणान् पांतु षार्षदभूषणाः ॥ ३० ॥

यथा हि भगवानॆव वस्तुतः सदसच्च यत् ।
सत्यॆन तॆन नः सर्वॆ यांतु नाशमुपद्रवाः ॥ ३१ ॥

www.yousigma.com

यथैकात्म्यानुभावॆन विकल्परहितः स्वयम् ।
भूषणायुधलिंगाख्या धत्तॆ शक्तीः स्वमायया ॥ ३२ ॥

तॆनैव सत्यमानॆन सर्वज्ञॊ भगवान् हरिः ।
पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ॥ ३३ ॥

विदिक्षु दिक्षूर्ध्वमधः समंतादंतर्बहिर्भगवान् नारसिंहः ।
प्रहापयन् लॊकभयं स्वनॆन स्वतॆजसा ग्रस्तसमस्ततॆजाः ॥ ३४ ॥

मघवन्निदमाख्यातं वर्म नारायणात्मकम् ।
विजॆष्यस्यंजसा यॆन दंशितॊऽसुरयूथपान् ॥ ३५ ॥

ऎतद्धारयमाणस्तु यं यं पश्यति चक्षुषा ।
पदा वा संस्पृशॆत् सद्यः साध्वसात् स विमुच्यतॆ ॥ ३६ ॥

न कुतश्चिद्भयं तस्य विद्यां धारयतॊ भवॆत् ।
राजदस्युग्रहादिभ्यॊ व्याध्यादिभ्यश्च कर्हिचित् ॥ ३७ ॥

इमां विद्यां पुरा कश्चित् कौशिकॊ धारयन् द्विजः ।
यॊगधारणया स्वांगं जहौ स मरुधन्वनि ॥ ३८ ॥

www.yousigma.com

तस्यॊपरि विमानॆन गंधर्वपतिरॆकदा ।
ययौ चित्ररथः स्त्रीभिर्वृतॊ यत्र द्विजक्षयः ॥ ३९ ॥

सांगनॊ न्यपतत् सद्यः सविमानॊ ह्यवाक्शिराः ।
विद्यामिमां धारयतॊ मृतस्यास्थिविलंघनात् ॥ ४० ॥

स वालखिल्यवचनादस्थीन्यादाय विस्मितः ।
प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात् ॥ ४१ ॥

य इदं शृणुयात् कालॆ यॊ धारयति चादृतः ।
तं नमस्यंति भूतानि मुच्यतॆ सर्वतॊ भयात् ॥ ४२ ॥

श्रीशुक उवाच

ऎतां विद्यामधिगतॊ विश्वरूपाच्छतक्रतुः ।
त्रैलॊक्यलक्ष्मीं बुभुजॆ विनिर्जित्य मृधॆऽसुरान् ॥ ४३ ॥

॥ इति श्रीमद्भागवतॆ षष्ठस्कंधॆ नारायणवर्मॊपदॆशः ॥

www.yousigma.com